Digitized by eGangotri and Sarayu Trust.

ॐ

श्रीमद्भावमिश्रकृतः-

भावप्रकाशनिघण्टुः

(सटिप्पणः)

जयपुरराज्यान्तर्गत आमोदग्रामनिवासिना सम्प्रति कलकत्तास्थ श्रीविशुद्धानन्द सरस्वतीविद्यालयायुर्वेद प्रधानाध्यापकेनायुर्वेदमहामहोपाध्यायेन रसायन-शास्त्रिणायुर्वेदाचार्य्येण भागीरथेन स्वामिना सम्पादितस्संशोधितश्च ।

स च

बम्बई-पुस्तक-भण्डार

१९५।१ हरीसन रोड, कलकत्ता ।

इत्यनेन प्रकाशितः ।

द्वितीयावृत्तिः

संवत् १९९९ मूल्य ३।)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ॐ

श्रीमद्भावमिश्रकृत:-

भावप्रकाशनिघण्टुः

(सटिप्पणः)

जयपुरराज्यान्तर्गत आमोदग्रामनिवासिना सम्प्रति कलकत्तास्थ श्रीविशुद्धानन्द सरस्वतीविद्यालयायुर्वेद प्रधानाध्यापकेनायुर्वेदमहामहोपाध्यायेन रसायन-शास्त्रिणायुर्वेदाचार्य्येण भागीरथेन स्वामिना सम्पादितस्संशोधितश्च ।

स च

बम्बई-पुस्तक-भण्डार

१९५।१ हरीसन रोड, कलकत्ता ।

इत्यनेन प्रकाशितः ।

द्वितीयावृत्तिः

संवत् १९९६ मूल्य १।)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आपको विशेष द्रष्टव्य होय तो हमारे लिखे हुए सन्दिग्ध निर्णय वनौषध शास्त्रको देखिये । यद्यपि हमने इसको संशोधन आदि कर इसको अत्युत्तम बना दिया है । फिर भी यदि कहीं अशुद्ध रह गया हो तो आप शुद्ध कर पढ़ेंगे तथा मुझे सूचना देंगे ।

आपका—

आयुर्वेद महामहोपाध्याय रसायन शास्त्री

भागीरथ स्वामी आयुर्वेदाचार्य

१४३, हरीसन रोड, कलकत्ता

तथा

सर्वहितैषी औषधालय

६४, लोआरचीतपुर रोड, कलकत्ता ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* गोरोचनानामानि—

गोरोचना तु माङ्गल्या वन्द्या गौरी च रोचना ।

गुणाः—

गोरोचना हिमा तिक्ता वश्या मङ्गलकान्तिदा ॥
विषालक्ष्मीग्रहोन्मादगर्भस्रावक्षतास्रजित् ।

† नख, नखीनामानि—

नखं व्याघ्रनखं व्याघ्रा युधं तच्चक्रकारकम् ॥ ८० ॥
नखं स्वल्पं नखी प्रोक्ता हनुर्हट्टविलासिनी ।

---

* संस्कृत—गोरोचना, मांगल्या । हि०—गोरोचन, गोलोचन । बँ०—गोरोचना । म०—गु०—कनाडी—गोरोचन । तै०---गोरोचनमु । इं०—गोलस्टोन स्विजूर (Goll-stone Beyoor) कनाडी—गायरोहन । अरबी----हजरुल-बक्कर । लेटिनमे Bostanrns

* संस्कृत—नख, व्याघ्रनख । हिन्दी—नख, नखी । बँगला—नख, गंधद्रव्य । मारवाड़ी मराठी—नखला, वाघनख । गुजराती---नखला । कनाडी—नख, बाघनख । इँगलिश—शेल (Shell) फारसी—ग्राहकसर । अरबी—इकलिलु-ल्मुलुक

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नखद्वयं ग्रहश्लेष्मवातास्रज्वरकुष्ठनुत् ॥ ८१ ॥
लघूष्णं शुक्लं वर्ण्यं स्वादु व्रणविषापहम् ।
अलक्ष्मीमुखदौर्गन्ध्यहृत्पाकरसयोः कटु ॥ ८२ ॥

* ह्रीबेरनामानि—

बालं ह्रीबेरबर्हिष्ठोदीच्यं केशाम्बुनाम च ।

* बालकगुणाः—

बालकं शीतलं रूक्षं लघुदीपनपाचनम् ॥ ८३ ॥
हृल्लासारुचिवीसर्पहृद्रोगामातिसारजित् ।

वीरणनामानि—

स्याद्वीरणं वीरतरुर्वीरं च बहुमूलकम् ॥ ८४ ॥

गुणाः—

वीरणं पाचनं शीतं शमनं लघु तिक्तकम् ।
स्ताम्भनं ज्वरनुद्भ्रांतिमदजित्कफपित्तहृत् ॥ ८५ ॥

---

* सं०—ह्रीबेर, बालक । हि०—सुगंधवाला । बँ०—बाल्य, गंधवाला । म० काला—वाला । गु०—बालो । कर्णाटली—बालदवेरु, खस मुष्टिवेल । तै०—वाटिवेल्लु । का० —असारु । स्तम्भनेज्वरनुदभ्रान्ति । इति पाठभेदः लेटि० पेवोनिया ओडोरेटा (Payonia odorata)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तृष्णास्रविषवीसर्पकृच्छ्रदाहव्रणापहम् ।

* उशीरनामानि—

वीरणस्य तु मूलं स्यादुशीरं नलदं च तत् ॥ ८६ ॥
अमृणालं च सेव्यं च समगन्धकमित्यपि ।

गुणाः—

उशीरं पाचनं शीतं स्तम्भनं लघु तिक्तकम् ॥ ८७ ॥
मधुरं ज्वरहृद्वांतिमदनुत्कफपित्तनुत् ।
तृष्णास्रविषवीसर्पदाहकृच्छ्रव्रणापहम् ॥ ८८ ॥

† जटामांसीनामानि—

जटामांसी भूतजटा जटिला च अतिस्विनी ।

---

* सं०—उशीर, नलद, अमृणाल । हि०—खस, वीरन । बँ०—ब्याणारमूल, वेणारमूल । म०—कालावाला । गु०—सवालो । क०—मुडिवाल । तै०—अवरुगट्टी । ता०—वेदिवेर । अस्य गुणानाह राजवल्लभे—उशीरं स्वेददौर्गंध्यदाहपित्तास्ररोगजित् । Andro Pogan muricatus एंड्रोपोगनम्यूरीकेटस नार्डोस्टेकिस जटामांसी Nardosta Chys. jatamansi गन्धमासी Nardusindices नार्डिस इण्डिसीस जटामाँसी गन्धमाँसी इस नामसे जटामांसी २ प्रकारकी होती है ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

मांसी तिक्ता कषाया च मेध्या कान्तिबलप्रदा ॥
स्वाद्वी हिमा त्रिदोषास्रदाहवीसर्पकुष्ठनुत् ।

* शिलापुष्पनामानि—

शैलेयं तु शिलापुष्पं वृद्धं कालानुसार्य्यकम् ॥ ६० ॥

गुणाः—

शैलेयं शीतलं हृद्यं कफपित्तहरं लघु ।
कण्डु कुष्ठाश्मरीदाहविषहृल्लासरक्तजित् ॥ ६१ ॥

† मुस्तकनामानि—

मुस्तकं न स्त्रियां मुस्तं त्रिषु वारिदनामकम् ।

---

† सं—जटामांसी, भूतजटा । हि०—जटामासी, बालछड़ । म०—तै०—जटामांसी । गु०—गु०—बालछड़ । क०—आकाश जटामांसी । इँ०—स्पिक्नार्ड (Spike nard) फा०—छबूल । अ०—सुम्बुलुत्तीव ।

* सं०—शैलेय, शिलापुष्प, शैलाख्य । हि०—भूरिछरीला, पत्थर का फूल । बँ०—शैलज । म०—दगडफूल । गु०—पत्थर फूल । क०—कलहू, कलड़ । तै०—शैलेयमने-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुरुविन्दोऽपरो भद्रमुस्तो नागरमुस्तकः ॥ ६२ ॥
कुरुविन्दश्च संख्यातोऽपरः क्रोडकसेरुकः ।

गुणाः—

मुस्तं हिमं कटु ग्राहि तिक्तं दीपनपाचनम् ।
कषायकफपित्तास्रतृड्ज्वरारुचिजन्तुजित् ॥ ६३ ॥
अनूपदेशे यज्जातं मुस्तकं तत् प्रशस्यते ।
तत्रापि मुनिभिः प्रोक्तं वरं नागरमुस्तकम् ॥ ६४ ॥

* कर्चूरनामानि—

कर्चूरो वेधमुख्यश्च द्राविडः काल्पकः शटी ।

गुणाः—

कर्चूरो दीपनो रुच्यः कटुकस्तिक्त एव च ॥ ६५ ॥

द्रव्यमु । फा०—दहाल । अ०—आशीना । लेटिनमे पामेलियापर्फोरेटा Parmclia Pertorata

† सं०—मुस्तक, बालेय । हि०—मोथा, नागरमोथा । बँ०—मुताथा । म०—मोथे, नागर मोथे । गु०—मोथ्य । क०—मुस्ता । तै०—तुंगमुस्त । ता०—कोरय । द्रा०—गरमोटा । फा०—शादकूफी । अ०—मुष्कजमीन । साइपरसरोटन्डस Cyperusrotundus

* सं०—कर्चूर । हि०—कचूर, काली हरदी । बँ०—एकांगी । म०—कचोरा । गु०—कचूरी । क०—कचोरा ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सुगन्धिः कटुपाकः स्यात्कुष्ठाशोंव्रणकासनुत् ।
उष्णो लघुहरेच्छ्वासगुल्मवातवकफक्रिमीन् ॥ ९६ ॥

* मुरामुरहरी एकांगीनामानि—

मुरा गन्धकुटी दैत्या सुरभिश्शालपर्णिका ।

गुणाः—

मुरा तिक्ता हिमा स्वाद्वी लघ्वी पित्तानिलापहा ॥
ज्वरासृग्भूतरक्षोघ्नी कुष्ठकासविनाशिनी ।

† गन्धपलाशीकपूरकचरीनामानि—

शठी पलाशी षड्ग्रन्था सुवृता गन्धमूलिका ॥ ९८ ॥
गन्धारिका गन्धवपुर्वधूः पृथुपलाशिका ।

गुणाः—

भवेद् गन्धपलाशी तु कषाया ग्राहिणी लघुः ॥ ९९ ॥

तै०—काचोरालु । इँ०—लौंग जेडसारो । (Long Zed-(saro फा०—जरंबाद । अ०—एरकुलकाफूर ।

* सं०—मुरा, गन्धिनी, शालपर्णी । हि०—एकांगी मुरा । बँगला—मुरामांसी । मराठी—एकांगी मुरा । क०—मुरे । गुजराती—मोरमांसी ।

† सं०—शटी, पलाशी । हिन्दी—गंधपलाशी, कचूर-भेदः । बँगला—शटी, आम आदा । मराठी—कपूरकचरी । क०—गन्धशटी । तै०—किचलिरागड्डलि । अ०—जरंबाद ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust

तिक्ता तीक्ष्णा च कटुकानुष्णास्यमलनाशिनी ।
शोथकासव्रणश्वासशूलहिध्मग्रहापहा ॥ १०० ॥

* प्रियंगुगन्धप्रियंगुनामानि—

प्रियंगुः फलिनी कांता लता च महिलाह्वया ।
गुन्द्रा गन्धफला श्यामा विष्वक्सेनाङ्गना प्रिया ॥

गुणाः—

प्रियंगुः शीतला तिक्ता तुवरानिलपित्तहृत् ।
रक्तातीसारदौर्गन्ध्यस्वेददाहज्वरापहा ॥ १०२ ॥
गुल्मतृड्विषमेहघ्नी तद्वद्गन्धप्रियंगुका ।
तत्फलं मधुरं रूक्षं कषायं शीतलं गुरु ॥ ३ ॥
विबन्धाध्मानबलकृत् संग्राहि कफपित्तजित् ।

---

* सं०—प्रियंगु । हि०—फूलप्रियंगु । बँ०—प्रियंगु । म०—गह्वला । गु०—घउलो । क०—नेर्पिल्गु । तै०—प्रेंकणपुचेट्टु । ता०—प्रियंगु । इस श्लोकमें प्रियंगु और गन्धप्रियंगुका वर्णन किया है । यहाँ प्रियंगु शब्दसे गोदनीका ग्रहण है गन्धप्रियंगु शब्दसे मुम्बइमेविकनेवाला (सुगन्धित बीजयुक्तगहुला लेना चाहिये ।)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

† रेणुकानामानि—

रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ॥ ४ ॥
भस्मगन्धा पाण्डुपुत्री स्मृता कौन्ती हरेणुका ।

गुणाः—

रेणुका कटुका पाके तिक्तानुष्णा कटुर्लघुः ॥ ५ ॥
पित्तला दीपनी मेध्या पाचनी गर्भपातिनी ।
बलासवातकृच्चैव तृट्कण्डुविषदाहनुत् ॥ ६ ॥

* ग्रन्थिपर्णनामानि—

ग्रन्थिपर्णं ग्रन्थिकं च काकपुच्छं च गुत्थकम् ।
नीलपुष्पं सुगन्धश्च कथितं तैलपर्णिकम् ॥ ७ ॥

---

† सं०—रेणुका, राजपुत्री । हि०—संभालू के बीज । बँ०—रेणुक । म०—रेणुकबीज । गु०—हरेणु । क०—रेणुका । ता०—येट्टी । यहाँ रेणुका शब्दसे सम्हालूके बीज नहीं लेना चाहिये—रेणुका एक भिन्न औषध है । हमारे संदिग्ध निर्णय वनौषध शास्त्रमें पढ़ना चाहिये ।

* सं०—ग्रन्थिपर्ण । हि०—गठिवन । बँ०—गैंठेला । म०—गठोना । क०—गाठिवन । स्थौणेयक—थुनेर । यह ग्रन्थिपर्णका एक भेद है ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

ग्रन्थिपर्णं तिक्ततीक्ष्णं कटूष्णं दीपनं लघु ।
कफवातविषश्वासकंडुदौर्गंध्यनाशनम् ॥ ८ ॥

स्थौणेयकनामानि—

स्थौणेयकं वर्हिवर्हं शुकबर्हं च कुक्कुरम् ।
शीर्णं रोम शुकं चापि शुकपुष्पं शुकच्छदम् ॥ ९ ॥

गुणाः—

स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं त्रिदोषनुत् ।
मेधाशुक्रकरं रुच्यं रक्षोऽश्रीज्वरजन्तुजित् ॥ १० ॥
हन्ति कुष्ठास्रतृड्दाहदौर्गन्ध्यतिलककालकान् ।

निशाचर (भटेउर इति नैपाले ग्रन्थिपर्णस्तद्भेदः अस्यनास्ति भाव प्रकाशे नामानि—)

निशाचरो धनहरः कितवो गणहासकः ॥ ११ ॥
रोचकः शङ्कितश्चण्डो दुष्पत्रः क्षेमको रिपुः ।

गुणाः—

रोचको मधुरस्तिक्तः कटुः पाके कटुर्लघुः ॥ १२ ॥
तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफानिलान् ।
रक्षोऽश्रीस्वेदमेदोस्रज्वरगन्धविषव्रणान् ॥ १३ ॥

निशाचर नैपालमे भटेउर

CC-0. In Public Domain. Funding by IKS-MoE

 Digitized by eGangotri and Sarayu Trust.

* तालीसपत्रनामानि—

तालीसमुक्तं पत्राढ्यं धात्रीपत्रं च तत्स्मृतम्।

गुणाः—

तालीसं लघु तीक्ष्णोष्णं श्वासकासकफानिलान्। १४॥
निहन्त्यरुचिगुल्मामवह्निमान्द्यक्षयामयान्।

† कक्कोलनामानि—

कक्कोलं कोलकं प्रोक्तं तथा कोशफलं स्मृतम् ॥१५॥

गुणाः—

कक्कोलं लघु तीक्ष्णोष्णं तिक्तं हृद्यं रुचिप्रदम्।

---

* सं०—तालीसपत्र, धात्रीपत्र। हि०—बँ०—क०—गु०—तालीसपत्र। म०—लघु तालीसपत्र। तै०—तालीशपत्री। द्रा०—पनिअल। फा०—जरनब। अ०—तालीसख।

† सं—कंकोल, कोलक। हि०—शीतल चीनी, कबाब चीनी। बँ०—काँकला। म०—कंकोल। गु०—चणकबाब। क०—कक्कोलद्दय। तै०—कबाक चीनी। इँ०—क्यूबेब पेपर (Cubeb Pepper) फा०—कबाबह। अ०—कबास।

CC-0. In Public Domain. Funding by IKS-MoE

 Digitized by eGangotri and Sarayu Trust.

आस्यदौर्गन्ध्यहृद्रोगकफवातामयान्ध्यहृत् ॥ १६ ॥

गन्धकोकिलागन्धमालतीगुणाः—

स्निग्धोष्णा कफहृत्तिक्ता सुगन्धा गन्धकोकिला ।
गन्धकोकिलया तुल्या विज्ञेया गन्धमालती ॥ १७ ॥

* लामज्जकनामानि—

लामज्जकं उशीरवत्पत्रच्छवितृण विशेषः ।
लामज्जक सुनालं स्यादमृणालं लयं लघु ।
इष्टकापथकं सेव्यं नलदं चावदातकम् ॥ १८ ॥

गुणाः—

लामज्जकं हिमं तिक्तं लघु दोषत्रयास्रजित् ।
त्वगामयस्वेदकृच्छ्रदाहपित्तास्ररोगनुत् ॥ १६ ॥

* एलवालुकनामानि—

कङ्कोलसदृशं कुष्टगन्धि बंगे काकोला ।

---

* सं०—लामज्जक । हि०—लामज्जक । बँ०—गंधवेणा । म०—लावज । गु०—सुगन्धि पीलु । तै०—तेल्लव।ट्टवेरु ।

* सं०—एला बालुक । हि०—सुगन्धकोकिला । बँ०—एलवालुका । तै०—कुतुखडम । म०—वेलची ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एलवालुकमैलेयं सुगन्धि हरिवालुकम् ।
ऐलवालुकमेलालु कपित्थं फलमीरितम् ॥ २० ॥

गुणाः—

एलवालु कटुकं पाके कषाये शीतलं लघु ।
हन्ति कण्डूव्रणच्छर्दितृट्कासारुचिहृद्रुजः ॥ २१ ॥
बलासविषपित्तास्रकुष्ठमूत्रगदक्रिमीन् ।

कुटन्नटनामानि—

कुटन्नटं दासपुरं वालेयं परिपेलवम् ॥ २२ ॥
प्लवगोपुरगोनर्दकैवर्त्तीमुस्तकानि च ।

गुणाः—

मुस्तावत्पेलवपुटं शुक्राभं स्याद्वितुन्नकम् ॥ २३ ॥
वितुन्नकं हिमं तिक्तं कषायं कटु कान्तिदम् ।
कफपित्तास्रवीसर्पकुष्ठकण्डूविषप्रणुत् ॥ २४ ॥

† स्पृक्कानामानि—

स्पृक्काऽसृक् ब्राह्मणी देवी मरुन्माला लता लघुः ।

---

† सं०—स्पृक्का । हि०—असवर्ग । बँ०—पिड्विशाक । म०—स्पृक्का, गगौना । क०—हिक्के । तै०—स्पृक्कुथनेडुद्रव्यमु । पर्पटी (पनडी) नलिका-पहाड़ी रतनज्योति प्रपौंडरक ।(पुडरिया)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समुद्रान्ता वधूः कोटिवर्षालङ्कोऽपिकेत्यपि ॥ २५ ॥

गुणाः—

स्पृक्का स्वाद्वी हिमा वृष्या तिक्ता निखिलदोषनुत् ।
कुष्ठकण्डूविषस्वेददाहास्रज्वररक्तहृत् ॥ २६ ॥

पर्पटी [पनडी] नामानि—

पर्पटी रंजना कृष्णा जतुका जननी जनी ।
जतुकृष्णाग्निसंस्पर्शा जतुकृच्चक्रवर्तिनी ॥ २७ ॥

गुणाः—

पर्पटी तुवरा तिक्ता शिशिरा वर्णकृल्लघुः ।
विषव्रणहरी कण्डूकफपित्तास्रकुष्ठनुत् ॥ २८ ॥

नलिकानामानि—

नलिका विद्रमलता कपोतचरणा नटी ।
धमन्यञ्जनकेशी च निर्मथ्या सुषिरा नली ॥ २९ ॥

गुणाः—

नलिका शीतला लघ्वी चक्षुष्या कफपित्तहृत् ।
कृच्छ्राश्मवाततृष्णास्रकुष्ठकण्डुज्वरापहा ॥ ३० ॥

प्रपौण्डरीकनामानि—

प्रपौण्डरीकं पौण्डर्य्यं चक्षुष्यं पौण्डरीयकम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

पौण्ड्र्यं मधुरं तिक्तं कषायं शुक्लं हिमम् ॥३१॥
चक्षुष्यं मधुरं पाके वर्ण्यं पित्तकफप्रणुत् ।

* पोदीनामानि—

व्यञ्जनो वान्तिहारी च रुचिष्यः शोकशोभनः ॥३२॥
व्यजनो वान्तिहारी च रोचनी शोकशोभना ।

गुणाः—

पुदीनस्तु गुरुः स्वादु रुच्यो हृद्यः सुखावहः ॥३३॥
मलमूत्र स्तम्भकरः कफकासमदापहः ।
अग्निमान्द्यविसूचिघ्नः संग्रहण्यतिसारहा ॥३४॥
जीर्णज्वरकृमींश्चैव नाशयेदिति कीर्तितम् ॥३५॥

---

* सं०—व्यञ्जन, वान्तिहारी । हि०—पोदीना । बँ—म०—पुदीना । गु०—फोदिनो । इँ०—टालरेडमेंट (Tallredment) फा०—नोअना । अ०—हवा ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुडूच्यादिवर्गः ।

तत्रादौ गुडूच्या उत्पत्तिर्नामानि गुणाश्च—

यदा लङ्केश्वरो मानी रावणो राक्षसाधिपः ।
रामपत्नीं वनात्सीतां जहार मदनातुरः ॥१॥

ततस्तं बलवान् रामो रिपुं जायापहारिणम् ।
वृतो वानरसैन्येन जघान रणमूर्द्धनि ॥२॥

हते तस्मिन् सुराराती रावणे बलगर्विते ।
देवराजः सहस्राक्षः परितुष्टो हि राघवे ॥३॥

तत्र ये वानराः केचिद् राक्षसैर्निहता रणे ।
तानिन्द्रो जीवयामास संसिच्यामृतवृष्टिभिः ॥४॥

ततो येषु प्रदेशेषु कपिगात्रात्परिच्युताः ।
पीयूषबिन्दवः पेतुस्तेभ्यो जाता गुडूचिका ॥५॥

* गुडूचीनामानि—

गुडूची मधुपर्णी स्यादमृतामृतवल्लरी ।

---

* सं०—गुडूची, मधुपर्णी । हि०—गिलोय, गुरुच । बं०—गुलंच । म०—गुलवेल । गु०—गलो । क०—अमर-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादिनीति च ॥६॥
जीवंती तंत्रिका सोमा सोमवल्ली च कुण्डली।
चक्रलक्षणिका धारा विशल्या च रसायनी ॥७॥
चन्द्रहासा वयस्था च मण्डली देवनिर्मिता।

गुणाः—

गुडूची कटुका तिक्ता स्वादुपाका रसायनी ॥८॥
संग्राहिणी कषायोष्णा लघ्वी बल्याग्निदीपनी।
दोषत्रयामतृड्दाहमेहकासांश्च पाण्डुताम् ॥९॥
कामलाकुष्ठवातास्रज्वरकृमिवमीन् हरेत् प्रमेह श्वा
सकासार्शः कृच्छ हृद्रोगवातनुत्।

* नागवल्ली (ताम्बूल) नामानि—

ताम्बूलवल्ली ताम्बूली नागिनी नागवल्लरी ॥१०॥
ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं तुवरं सरम्।

दवल्ली। तै०—तिप्पतिगा ता०—सिन्दी। इँ०—गुलाञ्चा (Gulancha) फा०—अ०—गिलोई। अस्या गुणानाह राजनिघण्टौ—

ज्ञेया गुडूची गुरुरुष्णवीर्या तिक्ता कषाया ज्वरनाशिनी च।
दाहार्तितृष्णावमिरक्तवातप्रमेहपाण्डुभ्रमिहारिणी च॥

* सं०—ताम्बूल, नागवल्ली। हि०—पान। बँ०—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

वश्यं तिक्तं कटु क्षारं रक्तपित्तकरं लघु ॥११॥
वल्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम् ।

* बिल्वनामानि—

बिल्वः शाण्डिल्य शैलूषो मालूरश्रीफलावपि ॥१२॥
गन्धगर्भः शलाटुश्च कण्टकी च सदाफलः ।

गुणाः—

श्रीफलस्तुवरस्तिक्तो ग्राही रूक्षोऽग्निपित्तकृत् ॥१३॥
वातश्लेष्महरो वल्यो लघुरुष्णश्च पाचनः ।

पान । म०—नागवेल । गु०—पानवेला । क०—नागरवल्ली । तै०—तामलपाकु । ता०—वेट्टिली । इं०—बीटलीफ़ (Beat leaf) फा०—बर्गतं बोल । अ०—कान । अस्य गुणानाह राजनिघण्टौ—

नागवल्ली कटुस्तीक्ष्णा तिक्ता पीनसवातजित् ।
कफकासहरा रुच्या दाहकृद्दीपनी परा ॥

* सं०—बिल्व, शाण्डिल्य, शैलूप । हि०—बँ०—म०—बेल । गु०—बिलोविलु । क०—बेललु । तै०—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* गंभारीनामानि—

गंभारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ॥१४॥
काश्मारी काश्मरी हीरा काश्मर्यः पीतरोहिणी ।
कृष्णवृन्ता मधुरसा महाकुसुमकापि च ॥१५॥

गुणाः—

काश्मरी तुवरा तिक्ता वीर्योष्णा मधुरा गुरुः ।
दीपनी पाचनी मेध्या भेदनी भ्रमशोथजित् ॥१६॥
दोषतृष्णामशूलार्शोविषदाहज्वरापहा ।
तत्फलं बृंहणं वृष्यं गुरु केश्यं रसायनम् ॥१७॥
वातपित्ततृषारक्तक्षयमूत्रविबन्धनुत् ।
स्वादु पाके हिमं स्निग्धं तुवराम्लं विशुद्धकृत् ॥१८॥
हन्याद्दाहतृषावातरक्ताकपित्तक्षतक्षयान् ।

मारेडी पंदुबिल्व । ता०—बिल्व पाकाम । इं०—बेंगालकिन्स (Bengal kins) लस्य गुणानाह राजवल्लभे—

फलेषु परिपक्वेषु, ये गुणाः समुदाहृताः ।
बिल्वादन्यत्र विज्ञेया बिल्वमामं गुणोत्तरम् ॥

* सं०—गंभारी, भद्रपर्णी । हि०—कुम्भेर, खम्भारी ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* पाटलानामानि—

पाटली पाटला मोघा मधुदूती फलेरुहा ॥१९॥
कृष्णवृन्ता कुबेराक्षी काचस्थाल्यलिवल्लभा ।
ताम्रपुष्पी च कथिता परा स्यात्पाटला सिता ॥२०॥
मुष्कको मोक्षको घण्टा पाटलिः काष्ठपाटला ।

गुणाः—

पाटला तुवरा तिक्तानुष्णा दोषत्रयापहा ॥२१॥
अरुचिश्वासशोथार्शश्छर्दिहिक्कातृषाहरी ।
पुष्पं कषायं मधुरं हिमं हृद्यं कफास्रनुत् ॥२२॥
पित्तातिसारहृत्कण्ठ्यं फलं हिक्कास्रपित्तहृत् ।

बँ०—गम्भारी। म०—शिवण गंभारी। गु०—शवन्य। क०—सीवनी। तै० —साल्लागुंबुटी चेट्टु।

† सं०—पाटला, अमोघा। हि०—पाढल, कठप ढार। बँ०—पारुल। म०—रक्तपाडल। गु०—राता फूलना। क०—हादरी। तै०—कलगिरु। ता०—पडि।

CC-0. In Public Domain. Funding by IKS-MoE

 Digitized by eGangotri and Sarayu Trust.

* अग्निमन्थनामानि—

अग्निमन्थो जया स स्यात् श्रीपर्णी गणकारिका ॥२३॥
जया जयन्ती तर्कारी नादेयी वैजयन्तिका।

गुणाः—

अग्निमन्थः श्वयथुनुद्वीर्योष्णः कफवातहृत ॥२४॥
पांडुनुत् कटुकस्तिक्तस्तुवरो मधुरोऽग्निदः।

† स्योनाकनामानि—

स्योनाकः शोषणश्च स्यान्नटकट्वङ्गटुंटुकः ॥२५॥
मण्डूकपर्णपत्रोर्णशुकनाशकुटुंनटाः।
दीर्घ वृन्तोऽरलुश्चापि पृथुशिम्बः कटम्भरः ॥२६॥

---

* सं०—अग्निमन्थ, अरणी। हि०—अरणी। बँ०—गणिर। म०—धोरऐरण। गु०—ऐरण, अरणी। क०—नरुबल। तै०—नेलिचेट्ट। अस्य गुणमाह शोडलनिघण्टौ—

अग्नि मंथो कटुस्तिक्तो वातशोफाम जित्सरः।

* सं०—श्योनाक, शोषण। हि०—सौनापाठा, एरलु, टेंटू। बँ०—सोना, सोनालु। म०—टेटु। गु०—अरडुसो। क०—शोणा तै०—पेद्दामानु। ता०—पन।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

स्योनाको दीपनः पाके कटुकस्तुवरो हिमः ।
ग्राही तिक्तोऽनिलश्लेष्मपित्तकासामनाशनः ॥२७॥
टुण्टुकस्य फलं बालं रूक्षं वातकफापहम् ।
हृद्यं कषायं मधुरं रोचनं लघु दीपनम् ॥२८॥
गुल्मार्शः कृमिहृत्प्रौढं गुरुवातप्रकोपनम् ।

बृहत्पञ्चमूलनामानि—

श्रीफलः सर्वतोभद्रा पाटला गणिकारिका ।
स्योनाकः पञ्चभिश्चैतैः पञ्चमूलं महन्मतम् ॥२९॥

गुणाः—

पञ्चमूलं महत्तिक्तं कषायं कफवातनुत् ।
मधुरं श्वासकासघ्नमुष्णं लघ्वग्निदीपनम् ॥३०॥

* शालपर्णीनामानि—

शालपर्णी स्थिरा सौम्या त्रिपर्णी पीवरी गुहा ।
विदारिगन्धा दीर्घांघ्रिर्दीर्घपत्रांशुमत्यपि ॥३१॥

---

* सं०—शालपर्णी, त्रिपर्णी । हि०—सरिवन । बँ०—शालपानी । म०—सालवण । गु०—शालिपर्णी । क०—मुरुलुवोने । तै०—शीयाकुपना ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

शालपर्णी गुरुश्छर्दिज्वरश्वासातिसारजित् ।
शोषदोषत्रयहरी बृंहण्युक्ता रसायनी ॥३२॥
तिक्ता विषहरी स्वादुः क्षतकासकृमिप्रणुत् ।

* पृश्निपर्णीनामानि— (अहिपर्ण्यपि)

पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्णिका ॥३३॥
क्रोष्टुविन्ना सिंहपुच्छी कलशी धावनी गुहा ।

गुणाः—

पृश्निपर्णी त्रिदोषघ्नी वृष्योष्णा मधुरा सरा ॥३४॥
हन्ति दाहज्वरश्वासरक्तातीसारतृड्वमीः ।

† बृहतीनामानि—

वार्ताकी क्षुद्रभण्टाकी महती बृहती कुली ॥३५॥
हिंगुली राष्ट्रिका सिंही महोटी दुःप्रधर्षणी ।

---

* सं०—पृश्निपर्णी, पृथक्पर्णी । हि०—पिठवन । बँ०—चाकुले, चाकुलिया । म०—पीठवण । गु०— पृष्टिपर्णी । क०—तोरेमोड । तै०—क्वोलाकुपन्न ।

† सं०—बृहती, क्षुद्रभण्टाकी । हि०—कटाई, बरहंटा । बं०—व्याकुड । म०—डोरली । गु०—उभीभोरंगणी । क०—हेग्गुल्लु । तै०—पेद्दामुलंगा, कुकसायी ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

बृहती ग्राहिणी हृद्या पाचनी कफवातहृत् ॥३६॥
कटुतिक्तास्यवैरस्यमलारोचकनाशिनी ।
उष्णा कुष्ठज्वरश्वासशूलकासाग्निमान्द्यजित् ॥३७॥

* कण्टकारीनामानि—

कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका ।
कण्टारिका कण्टकिनी धावनी बृहती तथा ॥३८॥

बृहतीभेदः—

क्षुद्रायां क्षुद्रकण्टाख्यां बृहतीति निगद्यते ।
श्वेता क्षुद्रा चन्द्रहासा लक्ष्मणा क्षेद्रदूतिका ॥३९॥
गर्भदा चन्द्रभा चन्द्री चन्द्रपुष्पा प्रियंकरी ।

गुणाः—

कण्टकारी सरा तिक्ता कटुका दीपनी लघुः ॥४०॥
रूक्षोष्णा पाचनी कासश्वासज्वरकफानिलान् ।

---

* सं० कण्टकारी, क्षुद्रा, व्याघ्री । हि०—कटेरी, भटकैया । बँ०—कण्टकारी । म०—रिंगणी । गु०—बेठी भोरिंगणी । क०—नेल्लगुल्लु । तै०—रेवटी मुलंगा ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

निहन्ति पीनसं पार्श्वपीडाकृमिहृद्रामयान् ॥४१॥
तयोः फलं कटु रसे पाके च कटुकं भवेत् ।
शुक्रस्य रेचनं भेदि तिक्तं पित्ताग्निकृल्लघु ॥४२॥
हन्यात्कफमरुत्कण्डूकासमेदःकृमिज्वरान् ।
तद्वद्प्रोक्ता सिता क्षुद्रा विशेषाद्गर्भकारिणी ॥४३॥

* गोक्षुरनामानि—

गोक्षुरःक्षुरकोऽपिस्यात्त्रिकण्टः स्वादुकण्टकः ।
गोकण्टको भक्षटंको वनशृङ्गाट इत्यपि ॥४४॥
पलंकषाश्वदंष्ट्रा च तथा स्यादिक्षुगन्धिकः ।

गुणाः—

गोक्षुरः शीतलः स्वादुर्बलकृद्बस्तिशोधनः ॥४५॥
मधुरो दीपनो वृष्यः पुष्टिदश्चाश्मरीहरः ।
प्रमेहश्वासकासार्शः कृच्छ्रहृद्रोगवातनुत् ॥४६॥

लघुपञ्चमूलनामानि—

शालपर्णी पृश्निपर्णी वार्ताकी कण्टकारिका ।

---

* सं०—गोक्षुर, क्षुरक । हि०—गोखुरू । बँ०—गोखरि । म०—सराटे । गु०—गोखरू । तै०—पालेरु । अस्य गुणानाह राजवल्लभे—गोक्षुरो मूत्रकृच्छ्रघ्नो बल्यो वृष्योऽनिलापहः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम् ॥४७॥

गुणाः—

पञ्चमूलं लघु स्वादु बल्यं पित्तानिलापहम् ।
नात्युष्णं बृंहणं ग्राहि ज्वरश्वासाश्मरीप्रणुत् ॥४८॥

दशमूलनामानि—

उभाभ्यां पञ्चमूलाभ्यां दशमूलमुदाहृतम् ।

गुणाः—

दशमूलं त्रिदोषघ्नं श्वासकासशिरोरुजः ॥४९॥
तन्द्राशोथज्वरानाहपार्श्वपीडारुचीर्हरेत् ।

* जीवन्तीनामानि—

जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ॥५०॥
माङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ।

गुणाः—

जीवन्ती शीतला स्वादुः स्निग्धा दोषत्रयापहा ॥५१॥
रसायनी बलकरी चक्षुष्या ग्राहिणी लघुः ।

---

* सं०—जीवन्ती, जीवनी, जीवा । हि०—डोंडी (जीवन्ती) बँ०—जीवई । म०—जीवन्ती । गु०—राडारुडी । क०—हिरियाहलि । बाजारमें असली जीवन्ती नहीं मिलती है ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* मुद्गपर्णीनामानि—

मुद्गपर्णी काकपर्णी शूर्पपर्ण्यल्पिका सहा ॥५२॥
काकमुद्गा च सा प्रोक्ता तथा मार्जारगन्धिका ।

गुणाः—

मुद्गपर्णी हिमा रूक्षा तिक्ता स्वाद्वी च शुक्रला ॥५३॥
चक्षुष्या क्षतशोथघ्नी ग्राहणी ज्वरदाहनुत् ।
दोषत्रयहरी लघ्वी ग्रहण्यर्शोतिसारजित् ॥५४॥

* माषपर्णीनामानि—

माषपर्णी सूर्पपर्णी काम्बोजी हयपुच्छिका ।
पाण्डुलोमशपर्णी च कृष्णवृन्ता महासहा ॥५४॥

---

* सं०—मुद्गपर्णी । हि०—मुगवन । बँ—मुगानि । म०—रानमूग । गु०—अडवाड मगवेल्य । क०—कोहसरु । तै०—कारुपेसारा ।

* सं०—माषपर्णी, सूर्पपर्णी, काम्बोजी । हि०—मखवन, वनउर्दी, जंगली उड़द । बँ०—माषाणी । म०—रान उड़ीद । गु०—सडबाड' अडदवेल । क०—रानो डिडुका उट्टु । तै०—कारुमीनुरु ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलासकृत् ।
मधुरा ग्राहिणी शोथवातपित्तज्वरास्रजित् ॥५६॥

जीवनीयगणनामानि—

अष्टवर्गः सयष्टीको जीवन्ती मुद्गपर्णिका ।
माषपर्णीगणोऽयं तु जीवनीय इति स्मृतः ॥५७॥
जीवनो मधुरश्चापि नाम्ना स परिकीर्तितः ।

गुणाः—

जीवनीयगणः प्रोक्तः शुक्रकृत् बृंहणो हिमः ॥५८॥
गुरुर्गर्भप्रदः स्तन्यकफकृत्पित्तरक्तहृत् ।
तृष्णा शोषं ज्वरं दाहं रक्तपित्तं व्यपोहति ॥५६॥

* शुक्लरक्तैरण्डनामानि—

शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्वहस्तकः ।
पञ्चांगुलो वर्द्धमानो दीर्घदण्डो व्यडम्बकः ॥६०॥
वातारिस्तरुणश्चापि रु वूकश्चनिगद्यते ।

---

* सं—एरण्ड, आमण्ड, चित्र । हि०—अण्ड, रेंड, एरण्ड । बँ—भेराण्डा । म०—एरंड, एरण्डोली । गु०—धोलो एरण्डो. रातो एरण्डो । क०—एरण्डु, आंडलके । तै०—आमुदमु, अमित मरेन्स । अँ०—कास्टर आयल प्लांट,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रक्तोऽपरोरुबूकः स्यादुरुबूको रुबुस्तथा ।
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः ॥ ६१ ॥

गुणाः—

एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत् ।
शूलशोथकटीबस्तिशिरः पीडोदरज्वरान् ॥ ६२ ॥
ब्रध्नश्वासकफानाहकासकुष्ठाममारुतान् ।
एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम् ॥ ६३ ॥
मूत्रकृच्छ्रहरं चापि पित्तरक्तप्रकोपनम् ।
वातार्यग्रदलं गुल्मवस्तिशूलहरं परम् ॥ ६४ ॥
कफवातक्रमीन् हन्ति वृद्धिं सप्तविधामपि ।
एरण्डफलमत्युष्णं गुल्मशूलानिलापहम् ॥ ६५ ॥
यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम् ।
तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहा ॥ ६६ ॥

आकारकरभनामानि—

आकार करभश्चैव कल्लकाथ ह्यकल्लकः ।

कास्टरसीड (Caster oil Plant, Caster Seed) फा०—वेदंजीर । अ०—खिरवा । सं०—अकल्लकं च आकारकरभ । हिन्दी—अकरकर, अक्कलकरा ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

आकल्लकोष्णो वीर्य्येण बलत्कटुको मतः ॥६७॥
प्रतिश्यायं च शोथं च वातं चैव विनाशयेत् ।

* शुक्लरक्तार्कनामानि—

श्वेतार्को गणरूपः स्यान्मन्दारो वसुकोऽपि च ॥
श्वेतपुष्पः सदापुष्पः स बालार्कः प्रतापसः ।
रक्तोऽपरोऽर्कनामा स्यादर्कपर्णो विकीरणः ॥ ६६ ॥
रक्तपुष्पः शुक्लफलस्तथा स्फोटः प्रकीर्तितः ।

---

* सं०—श्वेतार्क, गणरूप, रक्तार्क, अर्कपर्ण । हि०—सफेद मदार, सफेद रक्तार्क लाल मदार । बँ०—आकन्द, श्वेत आकन्द । म०—रुई, पांढरी रुई । क०—पक्के, मंदार पक्के । तै०—नीलजिल्लेडे घोली, तेलाजिल्लीडे । गु०—आंकडो, भोलो आकडो । इँ—जाइगेंटिक सालोवर्ट (Gigantic swallowwort) फा०--खुर्क, दूध । अ०—उषर । अस्य गुणानाह धन्वंतरि निघण्टौ—

अर्कः कृमिहरस्तीक्ष्णः सरोऽर्शः कफनाशनः ।
तद्रूपं कृमिदोषघ्नं हन्ति शूलोदराणि च ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

अर्कद्वयं सरं वातकुष्ठकण्डुविषव्रणान् ॥ ७० ॥
निहन्ति प्लीहगुल्मार्शःश्लेष्मोदरशकृत्क्रिमीन् ।
अलर्ककुसुमं वृष्यं लघुदीपनपाचनम् ॥ ७१ ॥
अरोचकप्रसेकार्शःकासश्वासनिवारणम् ॥ ७२ ॥

रक्तार्कपुष्पं मधुरं सतिक्तं—
कुष्ठक्रिमिघ्नं कफनाशनं च ।
अर्शोविषं हन्ति च रक्तपित्त—
संग्राहि गुल्मे श्वयथौ हितं तत् ॥ ७३ ॥

क्षीरमर्कस्य तिक्तोष्णं स्निग्धं सलवणं लघु ।
कुष्ठगुल्मोदरहरं श्रेष्ठमेतद्विरेचनम् ॥ ७४ ॥

* सेहुण्डनामानि

सेहुण्डः सिंहतुण्डः स्याद्वज्री वज्रद्रुमोऽपि च ।

---

* सं०—स्नुही, सेहुण्डा । हिं०—थूहर, सेहुण्ड । बँ०—मनसा गाछ । म०—निवडुंग । गु०—थोरदांडलियो । क०—निघर्डिगु । तै०—चेंमुडु । इं०— मिल्कस् हेज्ज प्रिक्लीपियर (Milks hedge, Prickly Pear) फा०—लादनाम । अ०—जकुम ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सुधासमन्तदुग्धा च स्नुक्स्त्रियां स्यात्स्नुहीगुडा ॥७५॥

गुणाः—

सेहुण्डो रेचनस्तीक्ष्णो दीपनः कटुको गुरुः।
शूलामष्ठीलिकाऽऽध्मानकफगुल्मोदरानिलान् ॥७६॥
उन्मादमेहकुष्ठार्शः शोथमेदोश्मपाण्डुताः।
व्रणशोथज्वरप्लीह विषदूषीविषं हरेत् ॥७७॥

स्नुही क्षीर गुणाः—

उष्णवीर्य्यं स्नुहीक्षीरं स्निग्धं च कटुकं लघु।
गुल्मिनां कुष्ठिनां चापि तथैवोदररोगिणाम् ॥७८॥
हितमेतद्विरेकार्थे ये चान्ये दीर्घरोगिणः।

* सेहुण्डभेदशातलानामानि—

शातला सप्तला सारविमला विदला च सा ॥७९॥
तथा निगदिता भूरिफेना चर्मकषेत्यपि।

गुणाः—

शातला कटुका पाके वातला शीतला लघु ॥८०॥

---

* सं०—शातला अपत्रा अंगुलिनिभा। हि०—सातला। बँ०—सिजविशेष। म०—निवगुंडाचा भेद। गु०—साथेर। क०—...ळीक सोवली। फा०—एशन। अ०—सातरा।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तिक्ता शोथकफानाहपित्तोदावर्तरक्तजित् ।

* कलिहारीनामानि—

कलिहारी तु हलिनी लाङ्गली [शक्र] शुक्रपुष्प्यपि ॥८१॥
विशल्याग्निशिखानन्ता वह्निवक्त्रा च गर्भनुत् ।
कलिहारी सरा कुष्ठशोफार्शोव्रणशूलजित् ॥८२॥
सक्षारा श्लेष्मजित्तिक्ता कटुका तुवरापि च ।
तीक्ष्णोष्णकृमिहृल्लघ्वी पित्तला गर्भपातिनी ॥८३॥

† श्वेतरक्तकरवीरनामानि—

करवीरः श्वेतपुष्पः शतकुम्भोऽश्वमारकः ।
द्वितीया रक्तपुष्पश्च चण्डान्तो सगुडस्तथा ॥८४॥

---

* सं०—कलिहारी, हलिनी । हि०—करियारी, कलियारी । बँ०—विषलांगला । म०—खड्य।नाग । गु०—दुधियो बछनाग । क०—राडागारी । इँ०—उल्फस वेन (Wolfs bane)

† सं०—करवीर, श्वेतपुष्प । हि०—कनेर लाल या सफेद कनेर । बँ०—करवी, लाल करवी । म०—कणेर, पांढरी, तांबड़ी । गु०—धोलां फूलनी, रातांफूलनी कणेर ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

करवीरद्वयं तिक्तं कषायं कटुकं च तत् ।
व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम् ॥८५॥
वीर्योष्णं कृमिकण्डुघ्नं भक्षितं विषवन्मतम् ।

* धत्तूरनामानि—

धत्तूरधूर्तधुस्तूरा उन्मतः कनजकाह्वयः ॥८६॥
देवताकितवस्तूरी महामोही शिवप्रियः ।
मातुलो मदनश्चास्य फले मातुलपुत्रकः ॥८७॥

गुणाः—

धत्तूरो मदवर्णाग्निवातकृज्ज्वरकुष्ठनुत् ।
कषायो मधुरस्तिक्तो यूकालिक्षाविनाशनः ॥८८॥
उष्णो गुरुव्रणश्लेष्मकण्डुकृमिविषापहः ।

क०—वाकण लिंगे, केगणलिंगे । तै०—कानेर चेट्टु । इँ—स्वीट् सेण्टेड (Sweet sented) फा०—खरजेहरा । अ०—सुमुल, हिमारदकली ।

* सं०—धत्तूर, मदन, उन्मत्त । हि०—धतूरा । बँ०—धुतुरा । म०—धोत्रा, धोतरा । गु०—धंतुरो । क०—मदकणिके । तै०—नाल्लाउम्मीते । ता०—उम-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* वासकनामानि—

वासको वसिका वासा भिषङ्माता च सिंहिका ॥
सिंहास्यो वाजिदन्तः स्यादाटरूषक इत्यपि ।
अटरूषो वृषनामा सिंहपर्णश्च स स्मृतः ॥६०॥

गुणाः—

वासको वातकृत्स्वर्यः कफपित्तास्रनाशनः ।
तिक्तस्तुवरको हृद्यो लघुः शीतस्तृडर्तिहृत ॥६१॥
श्वासकासज्वरच्छर्दिमेहकुष्ठक्षयापहः ।

* पर्पटनामानि—

पर्पटो वरतिक्तश्च स्मृतः पर्पटकश्च सः ॥६२॥
कथितः पांशुपर्यायस्तथा कवचनामकः ।

तताई । इँ०—थोर्न एपेल स्ट्रामोनियम (Thorn appele stramonium) अ०—जोजनसी तातूरा ।

* सं०—वासक, आटरूष । हि०—वासा, अडूसा, विसोंटा । बँ—वासक । म०—अडुलसा । गु०—अरडुसो क०—आडसोगे । तै०आडासारं । ता०—अधडोडे ।

ओरोकीलम इण्डीकम (Orocylum Indicume)

*सं०—पर्पट, वरतिक्त । हि०—वित पापड़ा, दवन

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पर्पटो हन्ति पित्तास्रभ्रमतृष्णाकफज्वरान् ॥६३॥
संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः ।

* निंबनामानि—

निम्बः स्यात्पिचुमर्दश्च पिचुमन्दश्च तिक्तकः ६४
अरिष्टः पारिभद्रश्च हिंगुनिर्यास इत्यपि ।

गुणाः—

निम्बः शीतो लघुर्ग्राही कटुपाकोऽग्निवातनुत् ॥
अहृद्यः श्रमतृट्कासज्वरारुचिक्रिमिप्रणुत् ।

पापड़ा । बँ०—खेत पापड़ा । म०—सिरपठी, पित्त-पापड़ा । गु०—पीपत पापडो । क०—पर्पटक । तै०—पार्पाटकमु । इँ०—जस्टिसि प्रोकेराबेंस (Justici Pracorabans) फा०—पित्तपापडा शातरा । अ०—बकलतलमलीक Rangiarepinse रंगियारेपीनसी

ले० फमेरिया पारवी फुलोरा Fumeria Parvi fulora

* सं०—निम्ब । हि०—नीम—बँ०—निमगाछ । म०—कडू निंब । गु०—लिंबड़ी । क०—बेड वेवु । तै०—वेपा, टोयचेट । ता०—वेपुम्मरम् । इँ०—निंबट्री (Nimbtree) फा०—तेनवनीम दरख्त हक़ । ले० Fameria Parbi Flora फमेरिया पारवी फलोरा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

व्रणपित्तकफच्छर्दिकुष्ठहल्लासमेहनुत् ॥९६॥
निम्बपत्रं स्मृतं नेत्र्यं कृमिपित्तविषप्रणुत् ।
वातलं कटुपाकं च सर्वारोचककुष्ठनुत् ॥९७॥
नैम्बं फलं रसे तिक्तं पाके तु कटु भेदनम् ।
स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शःकृमिमेहनुत् ॥९८॥

* महानिंबनामानि—

महानिम्बः स्मृतोद्रेको रम्यको विषमुष्टिकः ।
केशमुष्टिर्निम्बकश्च कार्मुको जीव इत्यपि ॥९९॥
महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः ।
कफपित्तभ्रमच्छर्दिकुष्ठहृल्लासरक्तजित् ॥ १०० ॥
प्रमेहश्वासगुल्मार्शोमूषिकाविषनाशनः ।

† पारिभद्रनामानि—

पारिभद्रो निम्बतरुर्मन्दारः पारिजातकः ॥१०१॥

---

* सं०—महानिम्ब । हि०—बकायन । बँ०—बोडा निम । म०—बकाणी निम्ब । गु०—बकान्य । क०—महाबेड । ते०—वेदया । ता०—मालाइवेतुवा वेप्पम् । फा०—आजाद दरख्त । अ०—बान हबुरु ।

† सं०—पारिभद्र । हि०—फरहद । बँ०—पालते ले० मेलेया एजेडेरक Melia Ajedarach.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

परिभद्रोऽनिलश्लेष्मशोथमेदःकृमिप्रणुत् ।
तत्पुष्पं पित्तरोगघ्नं कर्णव्याधिविनाशनम् ॥१०२॥

* काञ्चनारकोविदारनामानि—

काञ्चनारः काञ्चनको गण्डारिः शोणपुष्पकः ।
कोविदारश्चमरिकः कुद्दालो युगपत्रकः ॥१०३॥
कुण्डली ताम्रपुष्पश्चाश्मन्तकः स्वल्पकेसरी ।

गुणाः—

काञ्चनारो हिमो ग्राही तुवरः श्लेष्मपित्तहृत् ॥१०४॥
कृमिकुष्ठगुदभ्रंशगण्डमालाव्रणापहा ।
कोविदारोऽपि तद्वत्स्यात्तयोः पुष्पं लघु स्मृतम् ॥१०५॥
रूक्षं संग्राहि पित्तास्रप्रदरक्षयकासनुत् ।

मान्दार । म०—पानरो । गु०—पांडेरवो । क० हरिवाल । तै०—मुल्लमोति चेट्टु मोट्टुगु । ता०—मुराक एरिथिना इण्डिका Erythrina Indica.

* सं०—कांचनार, कोविदार । हि०—लचनार

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* श्याम-श्वेत-रक्त-शिग्रुनामानि—

शोभाञ्जनः शिग्रुतीक्ष्णगन्धकाऽक्षीवमोचकाः ॥१०६॥
तद्बीजं श्वेतमरिचं मधुशिग्रुस्तु लोहितः।

गुणाः—

शिग्रुः सरः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः ॥१०७॥
दीपनो रोचनो रूक्षः क्षारस्तिक्तो विदाहकृत्।
संग्राही शुक्रलो हृद्यो पित्तरक्त प्रकोपणः ॥ १०८ ॥
चक्षुष्यः कफवातघ्नो विद्रधिश्वयथुक्रिमीन्।
मेदोपचीविषप्लीहगुल्मगण्डव्रणान् हरेत् ॥१०९॥

फ०—कोचाले कचनार। तै०—देवकाञ्चन। बोहिनिया वोरियेगेट Bouhinia Yoricgate. अस्य गुणाः उक्ता निघण्टुरत्नाकरे—

कांचन्युक्ता शीर्षरुजं त्रिदोषं च विनाशयेत्।
स्तन्यस्य वर्द्धनकरी ऋषिभिः सूक्ष्मदर्शिभिः ॥

* सं०—शोभाञ्जन, शिग्रु। हि०—सहिंजन। बँ—सजिने। म०—शोगट, शेवगा। गु०—शरघवो। क०—विलियतुग्गि। तै०—मुलंगा। ता०—मोरंग। इँ०—हांसंरेडिश ट्री (Horse Radish Tree)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्वेतः प्रोक्तगुणो ज्ञेयो विशेषाद्दीपनः सरः(दाहकृद्भवेत)
प्लीहानं विद्रधिं हन्ति व्रणघ्नः पित्तरक्तकृत् ॥११०॥
मधुशिग्रुः प्रोक्तगुणो विशेषाद्दीपनः ! सरः।
शिग्रुवल्कलपत्राणां स्वरसः परमार्तिहृत् ॥१११॥
चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम्।
अवृष्यं कफवातघ्नं तन्नस्येन शिरोर्तिहृत् ॥११२॥

* श्वेतनीलपुष्पापराजितानामानि—

आस्फोतागिरिकर्णीस्यात्विष्णुक्रान्तापराजिता।

गुणाः—

अपराजिते कटू मेध्ये शीते कण्ठ्ये सुदृष्टिदे ॥११३॥
कुष्ठमूत्रत्रिदोषामशोथव्रणविषापहे।
कषाये कटुके पाके तिक्ते च स्मृतिबुद्धिदे ॥११४॥

---

* सं०—अपराजिता। हि०—कोयल, नीली कोयल। बँ०—अपराजिता। म०—गोकर्णी. काली पांढरी। गु०—गरणी। क०—विलीयगिरिकर्णिके। तै०—नीलगंटुना। मेजरीन क्लीटरिया टेरन्टिया ले० Mejecrin Clitaria ternitia.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* सिंदुवारनामानि—

सिन्दुवारः श्वेतपुष्पः सिन्दुकः सिन्दुवारकः ।
नीलपुष्पी तु निर्गुण्डी शेफाली सुवहा च सा ॥११५॥

गुणाः—

सिन्दुकः स्मृतिदस्तिक्तः कषायः कटुको लघुः ।
केश्यो नेत्रहितो हन्ति शूलशोथाममारुतान् ॥११६॥
कृमिकुष्ठारुचिश्लेष्मव्रणान्नीला हि तद्विधा ।
सिन्दुवारदलं जन्तुवातश्लेष्महरं लघु ॥११७॥

* कुटजनामानि—

कुटजः कुटिजः कौटो वत्सको गिरिमल्लिका ।

---

* सं०—सिन्दुवार । हि०—सम्हालू, निर्गुण्डी, मेउड़ी । बँ०—निशिन्दा । म०—निर्गुण्डी । गु०—नागड्य, नागड्यनावी । क०—करियल्लाक्किमेउडी विलीयलोके । ता०—नोक्चि । तै:—तेलवाविली । इँ०—फाइवलीव्ड चेष्ट ट्री (Fiveleaved chaste tree) फा०—परंगुष्ठ । अ०—असलुक ।

† सं०—कुटज । हि०—कौरैया । बँ०—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कालिङ्गश्चक्रशाखी च मल्लिकापुष्प इत्यपि ॥११८॥

गुणः—

इन्द्रयवफलः प्रोक्तो वृष्यकः पाण्डुरद्रुमः ।
कुटजः कटुको रूक्षो दीपतस्तुवरो हिमः ॥११९॥
अर्शोतिसारपित्तास्रकफतृष्णामकुष्ठजित् ।

* ह्रस्वकरञ्जनामानि—

करञ्जो नक्तमालश्च करजश्चिरबिल्वकः ॥१२०॥
घृतपूर्णः करञ्जोऽन्यः प्रकीर्यः पूतिकोऽपि च ।
स चोक्तः पूतिकारञ्जः सोमवल्कश्च स स्मृतः ॥१२१॥

कुडचि । म०—कुडा । गु०—कडो । क०—कोडसिगे-यमहनु । तै०—अंकेलुचंगलकुष्ठ । ता०—वेप्याले । इँ०—ओवल लीव्ड रोज़वे (Ovel leaved Raseday) अं०—तिवाज ।

* सं०—करञ्ज । हि०—कञ्जा, करंज । म०—गु०—करंज । क०—नापसीयमरनु । तै०—कानुग-चेट्ट ता०—पुंगानारम् इँ०—स्मूथलीव्ड पोनगेमिया (Smooth Leaved Pongamia)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

करञ्जः कटुकस्तीक्ष्णो वीर्योष्णो योनिदोषहृत् ।
कुष्ठोदावर्तगुल्मार्शोव्रणक्रिमिकफापहा ॥१२२॥
तत्पत्रं कफवातार्शःकृमिशोथहरं परम् ।
भेदनं कटुकं पाके वीर्योष्णं पित्तलं लघु ॥१२३॥
तत्फलं कफवातघ्नं मेहार्शःकृमिकुष्ठजित् ।
घृतपूर्णकरञ्जोऽपि करञ्जसदृशो गुणैः ॥१२४॥

तृतीयकरञ्जनामानि—

उदकीर्यस्तृतीयोऽन्यः षड्ग्रन्थो हस्तिवारुणी ।
मर्कटी वायसी चापि करञ्जी करभञ्जिका ॥१२५॥

गुणाः—

करञ्जी स्तम्भनी तिक्ता तुवरा कटुपाकिनी ।
वीर्योष्णा वमिपित्तार्शःकृमिकुष्ठप्रमेहजित् ॥१२६॥

* श्वेतरक्तगुञ्जानामानि—

श्वेता गुञ्जोच्चटा प्रोक्ता कृष्णला चापि सा स्मृता ।

---

* [illegible]

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रक्ता सा काकचिञ्ची स्यात्काकणन्ती च रक्तिका ॥१२७॥
काकादनी काकपीलुः सा स्मृताङ्गारवल्लरी ।

गुणाः—

गुञ्जाद्वयं तु केश्यं स्यात् वातपित्तज्वरापहम् ॥१२८॥
मुखशोषभ्रमश्वासतृष्णामदविनाशिनी ।
नेत्रामयहरं वृष्यं बल्यं कण्डुव्रणंहरेत् ॥१२९॥
कृमीन्प्रलुप्तकुष्ठानि रक्तानिधवलान्यपि ।

* कपिकच्छुनामानि—

कपिकच्छूरात्मगुप्ता ऋष्य प्रोक्ता च मर्कटी ॥१३०॥
अजहा कण्डुराव्यङ्गा दुःस्पर्शा प्रावृषायणी ।

कुँच, सादा कुँच । म०—गुंजा । गु०—चणोठी राती । क०—गुलगुंजे । तै०—गु०—क्षुविंदे । ता०—करिन । इं०—बीड ट्री (Bead tree) फा०—चश्मेखरूस । अ०—हब्बहर्ल, हब्ब सुफेद ।

* सं०—कपिकच्छु, आत्मगुप्ता । हि०—कँवाच, कौंच । बँ०—शूयाशिम्बी । म०—कुहिलींचे बीज । गु०—कउँचो,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लाँगूली शूकशिम्बी च सैव प्रोक्ता महर्षिभिः ॥१३१॥

गुणाः—

कपिकच्छुभृशं वृष्या मधुरा बृंहणी गुरुः ।
तिक्ता वातहरी बल्या कफपित्तास्रनाशिनी ॥१३२॥
तद्बीजं वातशमनं स्मृतं वाजीकरं परम् ।

*रोहिणीनामानि—

मांसरोहिण्यतिविषा वृत्ता चर्मकषा कृशा ॥१३३॥
प्रहारवल्ली विकसा वीरवत्यपि कथ्यते ।

नक्षुगुन्नी । तै०—पिल्लिअडुगु । ला०—पुनाइक, कालि । इँ०—कौहेज (Chowhege)

* सं०—रोहिणी । हि०—मांसरोहिणी । म०—क०—मांसरोहिणी । गु०—रोण्य । इँ०—रेडवुड ट्री (Red wood tree) अस्या गुणानाह निघण्टुरहस्ये—

मांसरोहिणिका व्रण्या चोष्णा च रक्तपित्तजित् ।

CC-0. In Public Domain. Funding by IKS-MoE
सर्वा संग्रहणी [illegible]

Digitized by eGangotri and Sarayu Trust.

लै०—सोयमीगा फेब्रिफिगा (Soyumiga Febrifiga.)

गुणाः—

स्यान्मांसरोहिणी वृष्या सरा दोषत्रयापहा ॥१३४॥

चिल्लकलक्षणम्—

चिल्लको वातनिर्हारी श्लेष्मघ्नो धातुपुष्टिकृत्।

हि०--चिल्लमल

गुणाः—

अग्नेयो विषवृक्षस्य फलं मत्स्यविवूदनम् ॥१३५॥

टंकारीलक्षणम्—

टङ्कारी वातजित्तिक्ता श्लेष्मघ्नी दीपनी लघुः।

गुणाः—

शोथोदरव्यथाहन्त्री हिता पीठपिसर्पिणाम् ॥१३६॥

* वेतसनामानि—

वेतसो नम्रकः प्रोक्तो वानीरो वंजुलस्तथा।

---

* सं०—वेतस, नम्रक। हि०—बेंत। बँ०—बेत, वयसा। म०—वेत, थोरवेत। गु०—नेतर। क०—वेडिमु। तै०—पीयारुवा। इं०—केन (Cane)। फा०—बेत।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अम्रपुष्पश्च विदलो रथः शीतश्च कीर्तितः ॥१३७॥
वेतसः शीतलो दाहशोथार्शोयोनिरुक्प्रणुत् ।
हन्ति वीसर्पकृच्छ्रास्रपित्ताश्मरिकफानिलान् ॥१३८॥

जलवेतसनामानि—

निकुञ्चकः परीव्याधो नादेयी जलवेतसः ।

गुणाः—

जलजो वेतसः शीतः कुष्ठहृद्वातकोपतः ॥१३९॥

इलेटीत वेरटीन वेरटीकेझाटा (Elatine vertia Verti Cellata.)

इज्जल [समुद्रशोष] नामानि—

इज्जलो हिज्जलश्चापि निचुलश्चाम्बुजस्तथा ।

गुणाः—

जलवेतसवद्वेद्यो हिज्जलोऽयं विषापहः ॥१४०॥

अङ्कोटनामानि---

अङ्कोटो दीर्घकोलः स्यायङ्कोलश्च निकोचकः ।

---

* सं०—अंकोट, निकोचक । हि०—ढेरा, टेरा । बं०—आँकड़ । म०—अंकोली वृक्ष । गु०—अंकोल्य । क०—अंकुले । तै०—उडीक । इं०—एलेनजियालेल मार्कीआई (Alengialate Marciai)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Saruyu Trust

गुणाः—

अङ्कोटकः कटुस्तीक्ष्णः स्निग्धोष्णस्तुवरो लघु ॥१४१॥
रेचनः क्रमिशूलामशोफग्रहविषापहा ।
विसर्पकफपित्तास्रमूषिकाहिविषापहा ॥१४२॥
तत्फलं शीतलं स्वादु श्लेष्मघ्नं बृंहणं गुरु ।
बल्यं विरेचनं वातपित्तदाहक्षयास्रजित् ॥१४३॥

*बला-महाबला-अतिबला-नागबलानामानि—

बला वाट्यालिका वाट्या सैव वाट्यालकापि च ।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ॥१४४॥

---

* सं०—बला । हि०—बरियारा । बँ०—वेडेला । म०—लघुचिकणा । गु०—बलदाणा । क०—वेणेगरग । तै०—मुरपिडी । इँ०—हार्न बीम लीव्ड सिडा (Hornbeam leaved siea) हार्ट लीव्ड सिडा (Hort leaved side) महाबलानामानि यथा—सं०—महाबला । हि०—सहदेई । बँ०—पीतपुष्प । म०—भाबुंडी । गु०—सहदेवी । ता०—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ततोऽन्यातिबला ऋष्यप्रोक्ता कङ्कतिका सहा।
गाङ्गेरुकी नागबला झषा ह्रस्वा गवेधुका ॥१४५॥

गुणाः—

बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत्।
स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम् ॥१४६॥
बलामूल त्वचश्चूर्णं पीतंसक्षीर शर्करम्।
मूत्राति सारंहरति दृष्टमेतन्न संशयः ॥१४७॥
हरेन्महाबला कृच्छ्रं भवेद् वातानु लोमिनी।
हन्यादतिबलामेहं पयसासितया समम् ॥१४८॥

लक्ष्मणानामानि—

पुत्रकाकाररक्तालपबिन्दुभिर्लाञ्छिता सदा।

नेचिट्टी। म०—पिरिवा। क०—बल्लुदुरुवे। (अतिबला-नामानि यथा—) सं०—अतिबला। हि०—कँगही, कंघी। म०—विकंकती। गु०—खपाट्य। क०—मुलुदुरुवे। इँ०—इण्डियन मेलो (Indian malow) नागबलानामानि यथा सं०—नागबला। हि०—गंगेरन, गुलसकरी। बँ०—गोरख चाकुले। म०—[illegible] । क०—[illegible] वे।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust

गुणाः—

लक्ष्मणा पुत्रजननी वस्तगन्धाकृतिर्भवेत् ॥१४९॥
कथिता पुत्रदाऽऽत्रस्यं वश्येयं मुनिपुङ्गवैः।

* स्वर्णवल्लीनामानि—

स्वर्णवल्ली रक्तफला काकायुः काकवल्लरी ॥१५०॥

गुणाः—

स्वर्णवल्ली शिरःपीडां त्रिदोषं हन्ति दुग्धदा।

† कार्पासीनामानि—

कार्पासी तुण्डकेशी च समुद्रान्ता च कथ्यते ॥१५१॥

गुणाः—

कार्पासको लघुः कोष्णो मधुरो वातनाशनः।
तत्पलाशं समीरघ्नं रक्तकृन्मूत्रवर्द्धनम् ॥१५२॥
तत्कर्णपिडकानादपूयास्रावविनाशनम् ।
तद्बीजं स्तन्यदं वृष्यं स्निग्धं कफकरं गुरु ॥१५३॥

---

* सं०—स्वर्णवल्ली। हि०—सोनवेल बँ०—स्वर्णवल्ली।

† सं०—कार्पासी। हि०—कपास, वेनौर। बँ०—कार्पास। म०—कापशी। क०—हत्ति, काडहत्ति। तै०—पत्तिचेट्टू। इँ०—काटन प्लांट (Cotton plant) फा०—कुसुम कत्तन।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* वंशनामानि—

वंशस्त्वक्सारकर्मारत्वचिसारतृणध्वजाः ।
शतपर्वा यवफलो वेणुमस्करतेजनाः ॥१५४॥

गुणाः—

वंशः सरो हिमः स्वादुः कषायो बस्तिशोधनः ।
छेदनः कफपित्तघ्नः कुष्ठास्रव्रणशोथजित् ॥१५५॥

वंशस्यकरीरस्यचयवयोर्गुणाः

तत्करीरः कटुः पाके रसे रूक्षो गुरुः सरः ।
कषायः कफकृत्स्वादुर्विदाही वातपित्तलः ॥ ५६॥
तद्यवास्तु सरा रूक्षा कषायः कटुपाकिनः ।
वातपित्तकरा उष्णा वद्धमूत्राः कफापहाः ॥१५७॥

† नलनामानि—

नलः पोटगलः शून्यमध्यश्च धमनस्तथा ।

---

* सं०—वंश । हि०—बाँस । बँ०—बाँश । म०—वेळू । गु०—बाँश । क०—यरडु विदीरु । तै०—कचिकई यदुरु । ता०—मनूगिल । इँ०—बम्बू केन (Bamboo cane) फा०—कसब ।

† सं०—नल । हि०—नरसल नरकट । इँ०—नल

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

नलस्तु मधुरस्तिक्तः कषायः कफरक्तजित् ॥१५८॥

*मुञ्जनामानि—

भद्रमुञ्जः शरो बाणस्तेजनश्चेक्षुमण्डनः ।
मुञ्जो मुञ्जातको बाणः स्थूलदर्भः सुमेखलः ॥१५९॥

गुणाः—

मुञ्जद्वयं तु मधुरं तुवरं शिशिरं तथा ।
दाहतृष्णाविसर्पास्त्रमूत्रकृच्छ्राक्षिरोगहृत् ॥१६०॥
दोषत्रयहरं वृष्यं मेखलासूपयुज्यते ।

बडनल । म०—नल, देवनल । गु०—नाली । क०—देवनाल । तै०—भंगुरुण्डु । इँ०—इंडियन टोबेको (Indian Tobaco)

* सं०—मुञ्ज । हि०—रामसर, मुँज । म—मोल । बं०—मुंज, रामशर, सरपत । तै०—मुंजगड्डि, अनिस्फुलिंग ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* कासनामानि—

कासः कासेक्षुरुद्दिष्टः स स्यादिक्षुरकस्तथा ॥१६१॥
इक्ष्वालिकेक्षुगन्धा च तथा पोटगलः स्मृतः ।

गुणाः—

कासः स्यान्मधुरस्तिक्तः स्वादुपाको हिमः सरः ॥१६२॥
मूत्रकृच्छ्राश्मदाहास्रक्षतपित्ताक्षिरोगजित् ।

† गुन्द्रनामानि—

गुन्द्रः पेटरको गुत्थः शृङ्गवेराभमूलकाः ॥१६३॥

गुणाः—

गुन्द्रः कषायो मधुरः शिशिरः पित्तरक्तजित् ।
स्तन्यः शुक्ररजोमूत्रशोधनो मूत्रकृच्छ्रहृत् ॥१६४॥

---

* सं०—कास । हि०—कांस । बं०—केशे घास । म०—कसई । गु०—कांसडो । क०—किरीय कागछु । तै०—रेलु । ले०—कुइक्स बारवेटा (Cocv Bargote)

† सं०—गुन्द्र, गुत्थ । हि०—गोंद पटेर । म०—पाणगवत । गु०—पान्यघाडाडी । इँ०—एलिफैंट ग्रास (Elephant grass)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* एरकनामानि—

एरका गुन्द्रमूला च शिवगुन्द्रा शरीति च ।

गुणः—

एरका शिशिरा वृष्या चक्षुष्या वातकोपिनी ॥१६५॥
मूत्रकृच्छ्राश्मरीदाहपित्तशोणितनाशिनी ।

† कुशनामानि—

कुशो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञभूषणः ॥१६६॥
ततोऽन्यो दीर्घपत्रः स्यात्क्षुरपत्रस्तथैव च ।

गुणाः—

दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम् ॥१६७॥
मूत्रकृच्छ्राश्मरीतृष्णाबस्तिरुक्प्रदरास्रजित् ।

---

* सं०—एरका, शिवगुन्द्रा । हि०—मोथी । बँ०—होगला । म०—गु०—एरका ।

† सं०—कुश, दर्भ । हि०—कुशा, डाभ । बँ०—कुश । मं०—लघुदर्भ, थोरदर्भ । गु०—दरभ, डाभ । म०—बिलीय-बुदकुशि । तै०—कुशादुर्भालु ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* कत्तृणनामानि—

कत्तृणं रोहिषं देवजग्धं सौगन्धिकं तथा ॥१६८॥
भूतीकं ध्याम पौरं च श्यामकं (म) धूपगन्धिकम् ।

गुणाः—

रोहिषं तुवरं तिक्तं कटुपाकं व्यपोहति ॥१६९॥
हृत्कण्डु(ण्ठ)व्याधिपित्तास्रशूलकासकफज्वरान् ।

† भूतृणनामानि—

भूतीकं गुह्यबीजं च सुगन्धं जम्बुकप्रियम् ॥१७०॥
भूतृणं तु भवेच्छत्रा मालातृणकमित्यपि ।

---

* सं०—कत्तृण, रौहिषतृण। हि०—रसघास, गंधेजघास। बँ०—रामकर्पूर। म०—रौहिष। क०—किसगंजणी। तै०—कामंचिगड्डि। फा०—खबाल मामूम। अ०—अजखर।

† सं०--हि०—भूतृण। गु०—भूतृण। क०—परिमलद गंजीणं।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

भूतृणं कटुकं तिक्तं तीक्ष्णोष्णं रेचनं लघु ॥१७१॥
विदाहि दीपनं रूक्षमनेत्र्यं मुखशोधनम् ।
अवृष्यं बहुविट्कं च पित्तरक्तप्रदूषणम् ॥१७२॥

* नीलदूर्वानामानि—

नीलदूर्वारुहानन्ता भार्गवी शतपर्विका ।
शष्पं सहस्रवीर्य्या च शतवल्ली च कीर्तिता ॥१७३॥

गुणाः—

नीलदूर्वा हिमा तिक्ता मधुरा तुवरा हरेत् ।
कफपित्तास्रवीसर्पतृष्णादाहत्वगामयान् ॥१७४॥

---

* सं०—दूर्वा, नीलदुर्वा । हि०—दूब, हरी दूब । बँ०—दूर्वा, नीलदूर्वा । म०— दूर्वा, गण्डूरदूर्वा । गु०—ध्रो, लीली ध्रो । क०—हछगरुके । तै०—दूर्वालु । ता०—अरुगम् तुल्लु । इं०—क्रीपिंग सायनोडन (Creeping cynodon)'

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्वेतदूर्वानामादि—

दूर्वा शुक्ला तु गोलोमी शतवीर्य्या च कथ्यते ।

गुणाः—

श्वेतदूर्वा कषाया स्यात्स्वद्वी व्रण्या च दीपनी ॥१७५॥
तिक्ता हिम विसर्पास्रतृट्पित्तकफदाहहृत् ।

गण्डदूर्वानामानि—

गण्डदूर्वा तु गण्डीरी मत्स्याक्षी शकुलादनी ॥१७६॥

गुणाः—

गण्डदूर्वा हिमा लोहद्रावणी ग्राहिणी लघुः ।
तिक्ता कषाया मधुरा वातकृत्कटुपाकिनी ॥१७७॥
दाहतृष्णाबलासास्रकुष्ठपित्तज्वरापहा ।

* विदारीकन्द-वाराहीकन्दनामानि—

वाराही कन्द एवान्यश्चर्मकारालुको मतः ॥१७८॥

---

* सं०—विदारीकन्द । हि०—बिलैयाकन्द । बँ०—भुइँकुमडा । म०—भूईकोहला । गु०—फगवेलानोकन्द । ले०—पुरेरिहा ट्यूबरोसा (Purariha tuberosa) । क०—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अनूपे स भवेद्देशे वराह इव लोमवान् ।
विदारी स्वादुकन्दा च सा तु क्रोष्ट्री सिता मता ॥१७९॥
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी ।
वाराही वरदा गृष्टिर्वदरेत्यभिधीयते ॥१८०॥

गुणाः—

विदारी मधुरा स्निग्धा बृंहणी स्तन्यशुक्रदा ।
शीता स्वर्य्या मूत्रला च जीवनी बलवर्णदा ॥१८१॥
गुरुः पित्तास्रपवनदाहान् हन्ति रसायनी ।

*मुशलीनामानी—

तालमूली तु विद्वद्भिर्मुशली परिकीर्तिका ॥१८२॥

नेलवुंबल । तै०—नेलगुंबुडु ।

* सं०—तालमूली, मुशली । हि०—काली मुसली, सफेद मुसली । बँ०—तालमूली । म०—काली मुसली, पाँढरी मुसली । गु०—काली मुसली, धोली मुसली । क०—नेलताड़ी । तै०—निलयताड़ी गड्डलु, नेलतारु । ले०—हाइपोक्सिज आर्चिओईडिस (Hypoxis orchioidis)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

मुशली मधुरा वृष्या वीर्योष्णा बृंहणी गुरुः ।
तिक्ता रसायनी हन्ति गुदजान्यनिलं तथा ॥१८१॥

* शतावरीनामानि—

शतावरी बहुसुता भीरुरिन्दीवरी वरी ।
नारायणी शतपदी शतवीर्या च पीरवी ॥१८२॥
महाशतावरी चान्या शतमूल्यूर्ध्वकण्टिका ।
सहस्रवीर्या हेतुश्च रिष्यप्रोक्ता महोदरी ॥१८३॥

---

* सं०—शतावरी, महाशतावरी । हि०—सतावर, बड़ी सतावर । बँ—शतमूली । म०—लघुशतावरी, आसवली । गु०—एकलकण्टो, शायनाशुआ । क०—करियआसडी, एरडु, आसडी । तै०—एदुमट्टी, टेङा चहल, चल्ल गड् डलु । इँ—एस्पेरेगस रेसिमोस (Asparags Recemouse) फा०—गुर्जदस्ति । अ०—शकाकुल मिश्री ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुणाः—

शतावरी गुरुः शीता तिक्ता स्वाद्वी रसायनी ।
मेधाग्निपुष्टिदा स्निग्धा नेत्र्या गुल्मातिसारजित् ॥१८४॥
शुक्रस्तन्यकरी बल्या वातपित्तास्रशोथजित् ।
महाशतावरी मेध्या हृद्या वृष्या रसायनी च ॥१८५॥
शीतवीर्या निहन्त्यर्शोग्रहणीनयनामयान् ।

अङ्कुरगुणाः—

तदंकुरस्त्रिदोषघ्नो लघुरर्शःक्षयापहा ॥१८६॥

* अश्वगन्धानामानि—

गन्धान्ता वाजिनामादिरश्वगन्धा हयाह्वया ।
वाराहकर्णी वरदा वदरा कुष्ठगन्धिनी ॥१८७॥

गुणाः—

अश्वगन्धानिलश्लेष्मश्वित्रशोथक्षयापहा ।

---

* सं—अश्वगन्धा । हि०—असगन्ध । बं०—अश्वगन्धा । म०—आसकन्द । गु०—आसखन्द । क०—आसादु । तै०—पिल्लिआँग । इँ—विण्टलचेरी (Wintel Cherry) फा०—मेहमन बरी ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

बल्या रसायनी तिक्ता कषायोष्णातिशुक्रला ॥१८८॥

* पाठानामानि—

पाठाम्बष्ठाम्बष्ठकी च प्राचीना पापचेलिका ।
एकाष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥१८९॥

गुणाः—

पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरी लघुः ।
हन्ति शूलज्वरच्छर्दिकुष्ठातीसारहृद्रुजः ॥१९०॥
दाहकुण्डूविषश्वासकृमिगुल्मगरव्रणान् ।

* श्वेतनिशोथनामानि—

श्वेतावृत्त्रिभण्डीस्यात् त्रिवृता त्रिपुटापि च ॥१९१॥

---

* सं०—पाठा, अम्बष्ठा । हि०—पाढ़ । बँ—निमुक, आखाँदि । म०—रहाड़मूल । गु०—काली पाढ, करेटीमूय । तै०—पाट चेट्टु । इँ०—परेरा रूट (Parera Root)।

* सं०—श्वेता निशोथा, त्रिवृत् । हिन्दी—निसोत, पनिलर । बँ०—तेड्डी । मराठी—निशोत्तर, तेंड । गु०—नसोत्तर । क०—तिगडे । तै०—आलतेगडा । ता०—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्वानुभूतिः सरलो निशोथो रेचनीति च ।

गुणाः—

श्वेता त्रिवृद्रेचनी स्यात् स्वादुरुष्णा समीरहृत् ॥१६२॥
रूक्षा पित्तज्वरश्लेष्मपित्तशोथोदरापहा ।

* श्यामात्रिवृन्नामानि—

त्रिवृच्छ्यामार्द्धचन्द्रा च पालिन्दी च सुषेणिका ॥१६३॥
मसूर विदलाकाली कार्पकाकालमेषिका ।

गुणाः—

श्यामा त्रिवृत्ततो हीनगुणा तीव्रविरेचनी ।
मूर्च्छादाहमदभ्रान्तिकण्ठोत्कर्षणकारिणी ॥१६४॥

† लघ्वीदन्तीनामानि—

लघ्वी दन्ती विशल्या च स्यादूदुम्बरपर्ण्यपि ।
तथैरण्डफला शीघ्रा स्येनघण्टा घुणप्रिया ॥१६५॥

शिवदई । इँ०—टरबीथरूट (Turbeath Root) फा०—निसोथ । अ०—तुरबुद ।

* सं०—श्यामनिसोथ । हिन्दी—काला निसोथ, श्यामनिलर । बँ०—काल तुड्डी । क०—केयप्नेयतिगडे ।

† सं०—दन्ती, विशल्या । हिन्दी—दन्ती, तिर-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाराहाङ्गी च कथि॰ा निकुम्भश्च मुकूलकः ।

* बृहद्दन्तीनामानि—

द्रवन्ती शम्बरी चित्रा प्रत्यक्पर्ण्याखुपर्ण्यपि ॥१६६॥
चित्रोपचित्रा न्यग्रोधी सुतश्रेणी तथा वृषा ।
उपचित्राश्रुतश्रेणी न्यग्रोधी च तषा वृषा ।
(इति पाठ भेदः)

गुणाः—

दन्तीद्वयं सरं पाके रसे च कटु दीपनम् ॥१६७॥
गुदांकुराश्मशूलार्शः कण्डुकुष्ठविदाहनुत् ।
तीक्ष्णोष्णं हन्ति पित्तास्रकफशोथोदरक्रिमीन् ॥१६८॥

लघुदन्तीफलगुणाः—

क्षुद्रदन्तीफलं तु स्यान्मधुरं रसपाकयोः ।
शीतलं सृष्टविण्मूत्रं गरशोथकफापहम् ॥१६९॥

फल । बँ०—दन्तो गाछ । मराठी—लघुदन्ती । गु०—दाँत एरले नेपालना मूल । क०—दन्ती । तै०—दन्ती चेट्टु, कोण्ड अमुदुम् । इँ०—क्रोटन् सीड्स् (Croten Seeds) फा०—दन्द । अरबी—अबुल मुलुक ।

* सं० —वृहद्दन्ती । हि०—मुगलाई अण्ड । म०—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

* बृहद्दन्तीफलनामानि—

जयपालो दन्तिबीजं विख्यातं तिन्तिडीफलम् ।

गुणाः—

जयपालो गुरुः स्निग्धो रेचो पित्तकफापहः ॥२००॥

† ऐन्द्रवारुणीनामानि—

ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी ।

थोरदन्ती । गु०—रतनजोत । क०—एरण्डने दन्ती । इँ०—दि फीजीसियण्ट (The Physiciant) फा०—शकार हुजुवा । अबुखलसा ।

* सं०—जयपाल, दन्तिबीज । हिन्दी—जमालगोटा । बँ०—जयपाल । म०—क०—जैपाल । गु०—नेपालो । इँ०—पार्जिंगब्रोटन (Parging Brotan) फा०—तुख्मे वेदंजीर-खताई । अ०—हब्बुस सलातीन ।

† सं०—इन्द्रवारुणी, ऐन्द्री । हिन्दी—इन्द्रायण, फरफेंदु । बं०—कुंदरुकी । मराठी—कांवडल । गुजराती—

[illegible] इँ०—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वारुणी च परा शुक्ला सा विशाला महाफला ॥२०१॥
श्वेतपुष्पा मृगाक्षी च मृगैर्वारुर्मृगादनी ।

गुणाः—

गवादनीद्वयं तिक्तं पाके कटुसरं लघु ॥२०२॥
वीर्य्योष्णं कामलापित्तकफप्लीहोदरापहम् ।
श्वासकासापहं कुष्ठगुल्मग्रन्थिव्रणप्रणुत् ॥२०३॥
प्रमेहमूढगर्भामगण्डामयविषापहम् ।

* नीलीनामानि—

नीली तु नीलिनी तूली कालादोला च नीलिका ॥२०४॥
रञ्जनी श्रीफली तुत्था ग्रामीणा मधुपर्णिका ।

कोलोसिंथ (Colocynth) फारसी—खुर्यजातल्स्त्र । अरबी—हंजल ।

* सं०—नीली, नीलिका । हिन्दी—नील, लील । बँगला—नीलगाछ । मराठी—गुली । गुजराती—गली । क—ह्विरीपनोली । तैलंगो—निलीजेट्टु । इँ०—इंडिगो (Indigo)

CC-0. In Public Domain. Funding by IKS-MoE